Total Pages – 4 **M.A. RNLKWC-/SANS/SAN-305A/22**

**2022**

**SANSKRIT**

**M.A. Third Semester End Examination - 2022**

**PAPER - SAN-305A**

*Full Marks : 40* *Time : 2 hours*

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

**(सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्)**

1. **यथेच्छं प्रश्नचतुष्टयं समाधेयम् ।** **2×4=8**

(i) 'श्रीलक्ष्मीरमणम्' इत्यस्य कोऽर्थः ?

(ii) भूषणग्रन्थस्य आधुनिकत्वनिरासः कथं भवति ?

(iii) वैयाकरणमते धातोः कति अर्थाः ? के च ते ?

*(Turn Over)*

(iv) मीमांसकमते तिङर्थः कः ?

(v) गान्धर्वविद्यायां प्रसिद्धाः सप्तस्वराः के? उदात्तादिषु तेषामन्तर्भावः प्रदर्शनीयः।

(vi) के पाठकाधमाः ?

2. **यथानिर्देशम् उत्तरत –**

क. **यथाभिलाषं त्रीन् समाधत्त।** 4×3=12

(i) कौण्डभट्टस्य सामान्यपरिचयो देयः।

(ii) फलव्यापारयोः परिचयो देयः।

(iii) प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधे 'पश्य मृगो धावति' इत्यत्र कथम् एकवाक्यता सिध्यति ?

(iv) कर्तृकर्मणोः आख्यातार्थे किं मानम् ? व्याख्यायताम्।

(v) 'क्रमादमुं नारद इत्यबोधि सः', 'पच्यते ओदनः स्वयमेव' इत्यादौ कीदृशः व्यभिचारो दृश्यते ? तस्य खण्डनं वा कथं स्यात् ?





ख. **अनुप्रियम् एकम व्याख्यात।** 4×1=4

(i) ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥

(ii) हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्॥

3. **यथानिर्देशं समाधेयम् –** 8×2=16

क. क्रियास्वरूपं भूषणसारदिशा प्रतिपाद्यताम्।

**अथवा**

व्याख्यायताम्–

व्यापारो भावना सैवोत्पादना सैव च क्रिया।

कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते॥

ख. कौण्डभट्टमते कति तिङर्था : ? कान् प्रति तेषां विशेषणत्वम् ? सोदाहरणम् आलोचयत।

**अथवा**

पाणिनीयशिक्षानुसारं वर्णा : कतिविधा : ? नामोल्लेखपूर्वकं तेषां परिचय : प्रदेय : ।

---